International Journal of Sanskrit Research 2020; 6(4): 177-179

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(4): 177-179
© 2020 IJSR
www.anantaajournal.com
Received: 02-05-2020
Accepted: 08-06-2020

**डॉ. नन्दिघोषमहापात्रः**
सहायकाचार्यः, सर्वदर्शनविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीसदाशिवपरिसरः, पुरी, उत्कलाः, भारत

**Corresponding Author:**
**डॉ. नन्दिघोषमहापात्रः**
सहायकाचार्यः, सर्वदर्शनविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीसदाशिवपरिसरः, पुरी, उत्कलाः, भारत

# वेदान्तदृष्ट्या मुक्तिः

**डॉ. नन्दिघोषमहापात्रः**

**प्रबन्धसारः**
संसारेऽस्मिन् सर्वोऽपि जीवः सुखमवाप्तुं दुःखञ्चापाकर्तुमिच्छति । तदर्थं भूयान् प्रयासोऽपि विधीयते । सत्स्वपि प्रयत्नेषु दुःखमेवावशिष्यते संसारस्य दुःखमयत्वात् । सांसारिकसुखं न सुखं भवति तद्दुःखस्वरूपमेव । अविद्यावृत्तकारणात् संसारे दुःखमपि सुखायते। तस्मात् परमसुखरूपा मुक्तिः एव जीवस्याभीष्टा। ईश्वरार्पणबुद्ध्या समुचितकर्मसम्पादनेनैव मुक्तिः सञ्जायते।

**कूटशब्दः** सुखमवाप्तुं दुःखञ्चापाकर्तुमिच्छति, सांसारिकसुखं न सुखं भवति तद्दुःखस्वरूपमेव।

**प्रस्तावना**
मुच् मोचने इत्यस्मात् धातोः क्तिन् प्रत्यये कृते मुक्ति इति पदं निष्पद्यते । दुःखपारावारेऽस्मिन् सर्वोऽपि जीवः सुखमिच्छति । सुखमिच्छता जनेन दुःखं निवारयितुं सुखमवाप्तुं च सर्वात्मना भूयान् प्रयासो विधीयते । कृतेऽपि प्रयत्ने दुःखमेवावशिष्यते संसारस्य दुःखमयत्वात् । सांसारिकसुखं न सुखं भवति तत् दुःखस्वरूपमेव । अविद्यावृत्तकारणात् संसारे दुःखमपि सुखायते । तस्मात् परमसुखरूपा मुक्तिः एव जीवस्याभीष्टः ।
धर्मार्थकाममोक्षाख्येषु अयं मोक्षः परमपुरुषार्थत्वेन वर्णितं शास्त्रेषु। मुक्तिनिमित्तम् आत्मज्ञानमेव साधनत्वेन स्वीकृतम्। कोऽहम् ? कुत आयातः ? किं मम जीवनस्य प्रयोजनम् ? इत्यादिनां प्रश्नानां समाधानेन दुःखं समूलं नश्येदेव तदुक्तं बृहदारण्यके –

**आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।**
**किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् ।।**[1]

**तत्त्वमसि**[2], **अहं ब्रह्मास्मि**[3], **अयमात्मा ब्रह्म**[4] इत्यादिभिः उपनिषद्वचनैः स्वात्मविज्ञानार्थं भृशमुपदिष्टम् । तस्य चात्मज्ञानस्य उपायः उपनिषत्सु प्रतिपादितम् ।

**"आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"** ।[5]

बन्धनस्य कारणमविद्या एव, अस्याः उच्छेदेन मुक्तिः सम्भवतीति वेदान्तविदामाशयः । तदुक्तमाचार्येण –

**"फलं च मोक्षोऽविद्या निवृत्तिर्वा"** ।[6]

अद्वैतसिद्धिग्रन्थस्य लघुचन्द्रिकाटीकायां अविद्यानिवृत्तिरेव मोक्षः इति मोक्षस्वरूपं प्रतिपादितम् ।

**"अविद्यास्तमयो मोक्षः"**।[7]

आचार्यसुरेश्वरः अविद्या एव संसारस्य बीजम् । तदुच्छेदे च मुक्तिरिति वक्ति –

**"अविद्या संसृतेबीजं तन्नाशे मुक्तिरात्मनः"** ।[8]

आचार्यशङ्करः अध्यासपदेन अविद्यां निर्दिश्य प्रतिपादयति अध्यासकारणादेव सर्वाः अपि मिथ्याकल्पनाः समुद्भूताः भवन्ति। अतः इयमविद्या अयमध्यासो वा अनर्थहेतुः बन्धनस्य कारणम् च । अतः अनर्थहेतोः निवारणार्थं वेदान्तशास्त्रमेवाश्रयणीयमिति। तदुक्तम् –

**अस्यानर्थहेतोः प्राहाणाय, आत्मैकत्वविद्याप्रतिपत्तये च सर्वे वेदान्ता आरभन्ते।**[9]

जीव एव ब्रह्मस्वरूपं भवति । परन्तु अविद्यावरणकारणात् तन्न प्रतिभाषते । तदुच्छेदेन मुक्तिः। तदुच्छेदश्च ज्ञानैकसाध्यः। ज्ञानं च गुरोः अनुकम्पया **तत्त्वमसि**[10] आदिवाक्यश्रवणात् तन्मननात् ध्यानाच्च **अहं ब्रह्मास्मि**[11] इत्यनुभवाज्जायते। तदेव अनुभवः ज्ञानमिति आचार्येण अपरोक्षानुभूतौ प्रत्यपादि –

**ब्रह्मैवाहं समं शान्तः सच्चिदानन्दलक्षणः।**
**नाहं देहोऽसद्रूपो ज्ञानमित्युच्यते बुधैः॥**[12]

तदात्मज्ञानसम्पादनं साधनचतुष्टयसम्पन्नेन भवतीति वेदान्तविदामाशयः । साधनचतुष्टयं च नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमादिषट्कसम्पत्तिः, मुमुक्षुत्वं च।

**ज्ञानादेव तु कैवल्यम्**[13]

ऋते ज्ञानान्न मुक्तिः इत्यादीनि वचनानि मोक्षः ज्ञानैकलभ्यः इति समुद्घोषयन्ति। यथा मेघस्य निवृत्यनन्तरं सूर्यः अवभासते तथैव अज्ञाननाशे सति ब्रह्मसाक्षात्कारो जायते। तदुक्तम् आत्मबोधे –

**परिच्छिन्न इवाज्ञानात्तनाशे सति केवलः।**
**स्वयं प्रकाश्यते ह्यात्मा मेघापायेंऽशुमानिव॥**[14]

**यथा अग्निना विना पाकः नैव सम्भवति तथैव ज्ञानेन विना न मोक्षः सिद्ध्यति। तदुक्तम् –**

**पाकस्य बह्निवज्ज्ञानं विना मोक्षो न सिद्ध्यति।**
**बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम्॥**[15]
**किञ्च यथा प्रकाशोदयेऽन्धकारः निवारितो भवति तथैव आत्मज्ञान सम्पादिते अज्ञाननिवृत्तिर्जायते।**

**तदुक्तम् –**

**अविरोधितस्य कर्म नाविद्यां विनिवर्तयेत्।**
**विद्याऽविद्यां निहन्त्येव तेजस्तिमिरसंघवत्॥**[16]

**एतदेव समर्थयति आचार्यशङ्करः –**

**मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद्भवति।**[17]
**सति च ज्ञानोदये मोक्षः सिद्ध्यतीति**
**ब्रह्मविद् ब्रह्मैव भवति।**[18]
**ब्रह्मविद् ब्रह्मणि स्थितः।**[19]
**तरति शोकमात्मविद्।**[20]

**इत्यादीनि वचनानि समुद्घलयन्ति। बृहदारण्यकोपनिषदि आचार्यशङ्करस्य वचनं यत् ज्ञानोदये सति साधकः मुक्तिपदमाप्नोति। इच्छया मुक्तः सन् ब्रह्मस्वरूपमधिगच्छति।**

**स च विद्वान् आप्तकाम आत्मकामतया इहैव ब्रह्मभूतः।**[21]

**एतदेवोपोद्वलयति उदाहरणमाध्यमेन उपनिषद् यथा शुद्धे जले शुद्धं जलं सिञ्च्यते चेत् तज्जलं शुद्धमेव तिष्ठति, तथैव आत्माऽऽपि ज्ञाते ब्रह्मणि ब्रह्मैव भवति। तदुक्तम् –**
**यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति।**
**एवं मुनेर्विजानत आत्मा भवति गौतम॥**[22]

**यथा वा नद्यः समुद्रं प्राप्य स्वनामरूपं विहाय समुद्रायन्ते, तथैव विद्वान् ब्रह्मविद् स्वनामरूपं परित्यज्य आत्मस्वरूपं भवति। तदुक्तम् –**

**यथा नद्यः स्यन्दमानाः समुद्रेऽ-**
**स्तं गच्छन्ति नामरूपे विहाय।**
**तथा विद्वान् नामरूपाद्विमुक्तः**
**परात्परं पुरुषमुपैति दिव्यम्॥**[23]

**मुक्तिकाले जीवो ब्रह्मस्वरूपं भवति। ब्रह्मणा सह एकत्वमेव मुक्तिः। ब्रह्मैव मुक्तावस्था भवति। मुक्तावस्था सर्वात्मभावं प्राप्नोति। तदुक्तमाचार्येण –**

**स एव सर्वात्मभाव सर्वसंसारधर्मातीतब्रह्मस्वरूपमेव।**[24]

**आचार्येण स्वीय ब्रह्मसूत्रे मुक्तिस्वरूपं वर्णयता तेषामेव शब्दानां प्रयोगो विहितः, येषां प्रयोगो ब्रह्मणः वर्णनम् अकारि। श्रीशङ्करभगवत्पादैः अशरीरत्वमेव मोक्ष इति वर्णितम्। तद्यथा –**

**"इदं तु पारमार्थिकं कूटस्थनित्यं व्योमवत्सर्वव्यापिसर्वविक्रिरहितं नित्यतृप्तं निरवयं स्वयंज्योतिः स्वभावम्। यत्र धर्माधर्मौ सहकार्येण कालत्रयं च नोपावर्तेते तदेतदशरीरत्वम्"।**[25] **इति।**

**मुक्तिः आनन्दरूपा, दुःखनिवृत्तिरूपा अस्ति। आप्तमोक्षपुरुषः शोकसागरं तरति इति प्रतिपादयति श्रुतिः –**

**तरति शोकमात्मविद्।**[26]

**ब्रह्मावगमानन्तरं मुक्तिप्राप्त्यनन्तरं वा सर्वमात्मैकत्वं भवति। तस्यामवस्थायां**

**सर्वं खल्विदं ब्रह्म।**[27]
**नेह नानास्ति किञ्चन।**[28]
**इदं सर्वं यदयमात्मा।**[29]
**अयमात्मा सर्वानुभूः।**[30]
**सर्वं ह्येतद्ब्रह्म**[31]
**आत्मैवेदं सर्वम्।**[32]

**इत्यादयः भावाः जागरिताः भवन्ति। तदानीं दुःखं, सुखं, मोहः किमपि भिन्नं न भवति। तदेव वचनं द्रढयति ईशावास्योपनिषद्-**

**तत्र को मोहः कः शोक एकत्वमनुपश्यतः।**[33]

**मुक्तावस्थायां जीवः आप्तकामो भवति आत्मतृप्तो भवति यदा कामनाः छिन्नाः भवन्ति तदानीं मरणधर्मी जीवः अमृतत्वं लभते। तदुक्तम् –**

**यदा सर्वे प्रमुच्यन्ते कामायेऽस्य हृदि श्रिताः।**
**अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥**[34]

मुक्तावस्थायां सर्वाण्यपि कर्माणि क्षीयन्ते । कर्मक्षये सति संस्कारनाशो भवति। संस्कारनाशे च शरीरधारणप्रक्रिया नश्यति। तदुक्तं मुण्डके –

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व संशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।।[35]

वस्तुतः जीवब्रह्मणोः ऐक्ये यदज्ञानावरणं तस्यैव निवृत्तिसम्पादनं मुक्तिः इति। यद्यपि इयं मुक्तिः ज्ञानैकसाध्या इति पूर्वोक्तम्। तथापि कर्म भक्तिः च तत्साधनान्तरं भवतः इति दर्शनान्तरेषु अवगम्यते। चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये[36] इति भगवत्पादवचनं ज्ञापयति यत् यद्यपि कर्मणा साक्षात् ब्रह्मावगमः न भवति तथापि परम्परया तु भवत्येव। कर्मणा चित्तशुद्धिः चित्तशुद्ध्या च ज्ञानावाप्तिः, ज्ञानाच्च मुक्तिः इति क्रममुक्तिः कर्मणा भवति इति आशयः। किञ्च निष्कामकर्मसम्पादनेन एव ज्ञानं प्राप्तुं शक्यते इति वर्णयति गीताचार्यः –

काम्यानां कर्मणा न्यासं सन्यासं कवयो विदुः।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः।।[37]

भक्तिरपि मोक्षसाधने हेतुर्भवति इति शास्त्रेषु प्रतिपादितम्। परा भक्तिः ज्ञानिनः एव भवति सा च ज्ञानस्वरूपा वर्तते। तया च मुक्तिः सम्भवति इति आचार्यैः तत्तत् शास्त्रेषु उपनिबद्धितं दृश्यते।

ज्ञानमेव मुक्त्यर्थं साधनमिति वेदान्तविदामाशयः। भगवान् वासुदेवोऽपि गीताशास्त्रे गायति –

ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा।[38]
अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि।।[39]
न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।[40]
ज्ञानं लब्ध्वा परां शन्तिमचिरेणाधिगच्छति।[41]

ज्ञानमेव साधनमात्मसाक्षात्कारार्थमात्मदर्शनार्थमिति आत्मसाक्षात्कारोपायः प्रदर्शितः बृहदारण्यके –

"आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"।[42]
आत्मवेत्ता संसारसागरात् तरति इति छान्दोग्ये उक्तम् -
तरति शोकमात्मविद्।[43]

ब्रह्मविदाप्नोति परम्[44] (तैत्ति. ) इति तैत्तिरीयवचनेन ब्रह्मवेत्ता ब्रह्मस्वरूपमाप्नोतीति मुक्तौ प्रमाणभूतम्।

अद्वैतवेदान्तविद्भिः मोक्षः न कर्मणा न वा भक्त्या लभ्यः अपि तु केवलं ज्ञानैक साध्यः इति। तद्यथा –

नास्त्यकृतः कृतेन।[45]
न कर्मणा न प्रजया धनेन
त्यागेनैक अमृतमानशुः।
परेणनाकं निहितं गुहायां
विभ्रजते यद्यतयो विशन्ति।।[46]

कर्मणा बन्धनं भवति ज्ञानेन च मुक्तिः इति उपनिषत्सु अपि प्रतिपादितम् -

तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।[47]
एवं मोक्षः नाम ज्ञानस्योदयः अज्ञानस्य नाशश्च।

जीवस्य स्वस्वरूपावस्थितिरेव मोक्षः। तदिदं द्रढयतीयं श्रुतिः – "स्वेन रूपेणाभिनिष्पद्यते"[48] इति। एवं वेदान्ते मुक्तिः निरूपिता वर्तते।

पादटिप्पणी -

1 - बृ.उ. ४-४-१२
2 - छा.उ. ६-८-७
3 - बृ.उ. १-४-१०
4 - बृ.उ. २-५-१९
5 - बृ.उ.२-४-५
6 - बृ.उ.शा.भा.-१-४-१७
7 - अद्वैतसिद्धिः (लघुचन्द्रिका) पृ.-२
8 - नैष्कर्म्यसिद्धिः १-७
9 - ब्र.सू.शा.भा. १-१-१
10 - छा.उ. ६-८-७
11 - बृ.उ. १-४-१०
12 - अपरोक्षानुभूतिः - २४
13 - भ.गी.शा.भा. १४-१०
14 - आत्मबोधः - ४
15 - आत्मबोधः - २
16 - आत्मबोधः - ३
17 - ब्र.सू.शा.भा. १-१-४
18 - मु.उ.३-२-९
19 - ध्यानबिन्दूपनिषद्. ५- ७
20 - छा.उ.७-१-३
**21** - बृ.उ. ४-४-६
**22** - कठ. ४-४-६
**23** - मुण्ड. ३-२-८
**24** - ब्र.सू.शा.भा. २-१
**25** - ब्रह्मसूत्र, शा.भा.- १-१-४
**26** - छा.उ. - ७-१-३
**27** - छा.उ - ३-१४-१
**28** - बृ.उ - ४-४-१९
**29** - बृ.उ - २-४-६
**30** - बृ.उ - २-५-१९
**31** - माण्डूक्योपनिषद् -२
**32** - बृ.उ - २-५-१
**33** - ईशा. ६
34 - कठ - २-३-१४
35 - मुण्ड. २-२-८
36 - वि.चू. ११
37 - गी. १८-२
38 - गी. ४-३७
39 - गी. ४-३६
40 - गी. ४-३८
41 - गी. ४-३९
42 - बृ.उ.२-४-५
43 - छा.उ.७-१-३
44 - तैत्ति. २-१-१
45 - मुण्ड. १-२-१२
46 - महानारायणोपनिषद् -१०५
47 - श्वे.उ ३-८
48 - छान्दोग्योपनिषद् ८-१२-१-१३

सन्दर्भग्रन्थाः


1. अमरकोशः अमरसिंहः चौखम्बा संस्कृत सीरीज आफिस वाराणसी, १९९८
2. आत्मबोधः श्रीशङ्कराचार्यः महेश-अनुसन्धनसंस्थानम्, वाराणसी १९८९
3. ईशादि नौ उपनिषद् गीताप्रेस, गोरखपुर २०१०
4. ईशाद्यष्टोत्तरशतोपनिषदः(शाङ्करभाष्यार्थ) वासुदेवलक्ष्मणपणशीकरः चौखम्बा विद्याभवन, वाराणसी २००२
5. उपनिषत्संग्रहः श्रीनगेन्द्रप्रसादजैन मोतिलाल बनारसी दास, दिल्ली १९७०
6. उपनिषद्वाक्यमहाकोषः मोतिलाल वनारसी दास, दिल्ली १९६३
7. कठोपनिषद् गीताप्रेस, गोरखपुर २०१०
8. छान्दोग्योपनिषद् गीताप्रेस,गोरखपुर २०१०
9. दार्शनिकनिबन्धाः डॉ. सुकान्तकुमारसेनापतिः मान्यता प्रकाशन, दिल्ली २०११
10. भारतीयदर्शन डॉ. उमेशमिश्रः उत्तरप्रदेश हिन्दी संस्थान, लखनऊ २००३
11. भारतीयदर्शन बलदेव उपाध्याय शारदा मन्दिर,वाराणसी २००९
12. भारतीयदर्शन की चिन्तनधारा प्रो. राममूर्त्तिशर्मा चौखम्बा विद्याभवन, वाराणसी २००३
13. महाभारतम् भगवान् व्यासः गीताप्रेस, गोरखपुर २००३
14. महोपनिषद् गीताप्रेस गोरखपुर २००३
15. वेदान्तसारः(विद्वन्मनोरञ्जिनी टीका) सदानन्दयतिः चौखम्बा विद्याभवन, वाराणसी २००२
16. श्रीमद्भगवद्गीता भगवान् व्यासः गीताप्रेस, गोरखपुर २००९